✧˖°*❋ ❋*°˖✧

# ভজ গোবিংদম্

# Bhaj Govindam
## in **bengali**

✧˖°*❋ ❋*°˖✧

## ॥ ভজ গোবিংদম্ ॥

ভজ গোবিংদং ভজ গোবিংদং
গোবিংদং ভজ মূঢমতে ।
সংপ্রাপ্তে সন্নিহিতে কালে
নহি নহি রক্ষতি ডুকৃংকরণে ॥ 1 ॥

মূঢ জহীহি ধনাগমতৃষ্ণাং
কুরু সদ্বুদ্ধিং মনসি বিতৃষ্ণাম্ ।
যল্লভসে নিজকর্মোপাত্তং
বিত্তং তেন বিনোদয চিত্তম্ ॥ 2 ॥

নারীস্তনভর-নাভীদেশং
দৃষ্ট্বা মা গা মোহাবেশম্ ।
এতন্মাংসবসাদিবিকারং
মনসি বিচিংতয বারং বারম্ ॥ 3 ॥

নলিনীদল-গতজলমতিতরলং
তদ্বজ্জীবিতমতিশয-চপলম্ ।
বিদ্ধি ব্যাধ্যভিমানগ্রস্তং
লোকং শোকহতং চ সমস্তম্ ॥ 4 ॥

যাবদ্বিত্তোপার্জনসক্তঃ
তাবন্নিজপরিবারো রক্তঃ ।
পশ্চাজ্জীবতি জর্জরদেহে
বার্তাং কোঽপি ন পৃচ্ছতি গেহে ॥ 5 ॥

যাবত্পবনো নিবসতি দেহে
তাবত্পৃচ্ছতি কুশলং গেহে ।
গতবতি বাযৌ দেহাপাযে
ভার্যা বিভ্যতি তস্মিন্কাযে ॥ 6 ॥

বালস্তাবত্ক্রীডাসক্তঃ
তরুণস্তাবত্তরুণীসক্তঃ ।
বৃদ্ধস্তাবচ্চিংতাসক্তঃ
পরমে ব্রহ্মণি কোঽপি ন সক্তঃ ॥ 7 ॥

কা তে কাংতা কস্তে পুত্রঃ
সংসারোঽযমতীব বিচিত্রঃ ।
কস্য ত্বং কঃ কুত আযাতঃ
তত্ত্বং চিংতয তদিহ ভ্রাতঃ ॥ 8 ॥

সত্সংগত্বে নিস্সংগত্বং
নিস্সংগত্বে নির্মোহত্বম্ ।
নির্মোহত্বে নিশ্চলতত্ত্বং
নিশ্চলতত্ত্বে জীবন্মুক্তিঃ ॥ 9 ॥

বযসি গতে কঃ কামবিকারঃ
শুষ্কে নীরে কঃ কাসারঃ ।
ক্ষীণে বিত্তে কঃ পরিবারঃ
জ্ঞাতে তত্ত্বে কঃ সংসারঃ ॥ 10 ॥

মা কুরু ধন-জন-যৌবন-গর্বং
হরতি নিমেষাত্কালঃ সর্বম্ ।
মাযামযমিদমখিলং হিত্বা
ব্রহ্মপদং ত্বং প্রবিশ বিদিত্বা ॥ 11 ॥

দিনযামিন্যৌ সাযং প্রাতঃ
শিশিরবসংতৌ পুনরাযাতঃ ।
কালঃ ক্রীডতি গচ্ছত্যাযুঃ
তদপি ন মুংচত্যাশাবাযুঃ ॥ 12 ॥

কা তে কাংতা ধনগতচিংতা
বাতুল কিং তব নাস্তি নিযংতা ।
ত্রিজগতি সজ্জনসংগতিরেকা
ভবতি ভবার্ণবতরণে নৌকা ॥ 13 ॥

দ্বাদশ-মংজরিকাভিরশেষঃ
কথিতো বৈযাকরণস্যৈষঃ ।
উপদেশোঽভূদ্বিদ্যা-নিপুণৈঃ
শ্রীমচ্ছংকর-ভগবচ্ছরণৈঃ ‖ 14 ‖

জটিলো মুংডী লুংছিতকেশঃ
কাষাযাংবর-বহুকৃতবেষঃ ।
পশ্যন্নপি চ ন পশ্যতি মূঢঃ
উদরনিমিত্তং বহুকৃতবেষঃ ‖ 15 ‖

অংগং গলিতং পলিতং মুংডং
দশনবিহীনং জাতং তুংডম্ ।
বৃদ্ধো যাতি গৃহীত্বা দংডং
তদপি ন মুংচত্যাশাপিংডম্ ‖ 16 ‖

অগ্রে বহ্নিঃ পৃষ্ঠে ভানুঃ
রাত্রৌ চুবুক-সমর্পিত-জানুঃ ।
করতল-ভিক্ষস্তরুতলবাসঃ
তদপি ন মুংচত্যাশাপাশঃ ‖ 17 ‖

কুরুতে গংগাসাগরগমনং
ব্রত-পরিপালনমথবা দানম্ ।
জ্ঞানবিহীনঃ সর্বমতেন
ভজতি ন মুক্তিং জন্মশতেন ‖ 18 ‖

সুরমংদির-তরু-মূল-নিবাসঃ
শয্যা ভূতলমজিনং বাসঃ ।
সর্ব-পরিগ্রহ-ভোগত্যাগঃ
কস্য সুখং ন করোতি বিরাগঃ ‖ 19 ‖

যোগরতো বা ভোগরতো বা
সংগরতো বা সংগবিহীনঃ ।
যস্য ব্রহ্মণি রমতে চিত্তং
নংদতি নংদতি নংদত্যেব ‖ 20 ‖

ভগবদগীতা কিংচিদধীতা
গংগাজল-লবকণিকা পীতা ।
সকৃদপি যেন মুরারিসমর্চা
ক্রিযতে তস্য যমেন ন চর্চা ॥ 21 ॥

পুনরপি জননং পুনরপি মরণং
পুনরপি জননীজঠরে শযনম্ ।
ইহ সংসারে বহুদুস্তারে
কৃপযাঽপারে পাহি মুরারে ॥ 22 ॥

রথ্যাচর্পট-বিরচিত-কংথঃ
পুণ্যাপুণ্য-বিবর্জিত-পংথঃ ।
যোগী যোগনিযোজিত-চিত্তঃ
রমতে বালোন্মত্তবদেব ॥ 23 ॥

কস্ত্বং কোঽহং কুত আযাতঃ
কা মে জননী কো মে তাতঃ ।
ইতি পরিভাবয সর্বমসারং
বিশ্বং ত্যক্ত্বা স্বপ্নবিচারম্ ॥ 24 ॥

ত্বযি মযি চান্যত্রৈকো বিষ্ণুঃ
ব্যর্থং কুপ্যসি ময্যসহিষ্ণুঃ ।
ভব সমচিত্তঃ সর্বত্র ত্বং
বাংছস্যচিরাদ্যদি বিষ্ণুত্বম্ ॥ 25 ॥

শত্রৌ মিত্রে পুত্রে বংধৌ
মা কুরু যত্নং বিগ্রহসংধৌ ।
সর্বস্মিন্নপি পশ্যাত্মানং
সর্বত্রোত্সৃজ ভেদাজ্ঞানম্ ॥ 26 ॥

কামং ক্রোধং লোভং মোহং
ত্যক্ত্বাঽঽত্মানং পশ্যতি সোঽহম্ ।
আত্মজ্ঞানবিহীনা মূঢাঃ
তে পচ্যংতে নরকনিগূঢাঃ ॥ 27 ॥

গেযং গীতা-নামসহস্রং
ধ্যেযং শ্রীপতি-রূপমজস্রম্ ।
নেযং সজ্জন-সংগে চিত্তং
দেযং দীনজনায চ বিত্তম্ ॥ 28 ॥

সুখতঃ ক্রিযতে কামাভোগঃ
পশ্চাদংত শরীরে রোগঃ ।
যদ্যপি লোকে মরণং শরণং
তদপি ন মুংচতি পাপাচরণম্ ॥ 29 ॥

অর্থমনর্থং ভাবয নিত্যং
নাস্তিততঃ সুখলেশঃ সত্যম্ ।
পুত্রাদপি ধনভাজাং ভীতিঃ
সর্বত্রৈষা বিহিতা রীতিঃ ॥ 30 ॥

প্রাণাযামং প্রত্যাহারং
নিত্যানিত্য বিবেকবিচারম্ ।
জাপ্যসমেতসমাধিবিধানং
কুর্ববধানং মহদবধানম্ ॥ 31 ॥

গুরুচরণাংবুজ-নির্ভরভক্তঃ
সংসারাদচিরাদ্ভব মুক্তঃ ।
সেংদ্রিযমানস-নিযমাদেবং
দ্রক্ষ্যসি নিজহৃদযস্থং দেবম্ ॥ 32 ॥

মূঢঃ কশ্চন বৈযাকরণো
ডুঃকৃংকরণাধ্যযনধুরীণঃ ।
শ্রীমচ্ছংকর-ভগবচ্ছিষ্যৈঃ
বোধিত আসীচ্ছোধিত-করণঃ ॥ 33 ॥

ভজ গোবিংদং ভজ গোবিংদং
গোবিংদং ভজ মূঢমতে ।
নামস্মরণাদন্যমুপাযং
নহি পশ্যামো ভবতরণে ॥ 34 ॥

✧˳·˖°*❋ ❋*°˖·˳✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net